श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री सम्पत्तैय्यन्गार् विरचितं

# ॥ श्री भूपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भूपञ्चकम् ॥

मातर्भूः परिभूर्जना न सहसा जानन्ति ते वैभवम्
    विज्ञानी मनुते ह्यजा जडमिदं त्वां विश्वमापाततः।
विश्वव्याप्तिमता च ते मनसि नो तस्यास्ति मुग्धात्मनः
    शास्त्रं वक्ति बुधा वदन्ति महिमा तेऽनन्त इत्यादिभिः ॥ 1 ॥

सप्तव्याहृतिषु त्वमेव गुणतो मूलं बलं ज्ञानिनां
    त्वां संत्यज्य न कांचिदप्यमलतां योगी परां प्राप्नुते।
प्रामाण्यं च भवत्यपीह विशदं त्र्य्यन्तसिद्धं तथा
    नित्या ते करुणा यथा ननु महीदासो बभूवेति च ॥ 2 ॥

त्यक्ता या सुगुणान्वितापि पतिना पुत्रेण मान्येतरा
    भूत्वा सा पुनरप्यवाप महितां कारुण्यतो देवि ते।
येनाद्येह विराजते ह्युपनिषन्नित्यैत्तरेया परा
    त्वां नित्यं प्रणमामि मातरि पुनः किं वा परं तिष्ठति ॥ 3 ॥

प्राणायामजपादि योगविधयस्त्वत्प्राप्तये निश्चिताः
    त्वां सम्मान्य जनस्तदेतदखिलं सन्यस्यति ह्यादितः।
त्वय्येवादरधीस्तदेवशरणागत्याखिलं प्राप्नुते
    सौलभ्यं तव मानयन्ति मनुजा विश्वासभून्नैव हि ॥ 4 ॥

वन्दे त्वामरविन्दलोचनवधूं नित्यानुकूलां विभोः
    अल्पिष्ठामपि मे मतिं बहुतरं सम्मान्य रक्षिष्यसि।
नेदीयांसमहं दरं न कथमप्यालोचये दक्षिणां
    क्षीणो दुर्मतिरापदूर्मिविहतो मुक्तिप्रदां संश्रये ॥ 5 ॥

॥ श्री भूपञ्चकं समाप्तम् ॥